# श्रीमद् भागवत रसिक कुटुंब

## कीलकम्

ॐ अस्य श्रीकीलकमन्त्रस्य शिवऋषिः, अनुष्टुप् छन्दः,
श्रीमहासरस्वती देवता, श्रीजगदम्बाप्रीत्यर्थं(म्)
सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

ॐ नमश्चण्डिकायै ।
मार्कण्डेय उवाच ।
ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयः(फ्)प्राप्तिनिमित्ताय नमः(स्) सोमार्धधारिणे ॥ 1॥

सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकम् ।
सोऽपि क्षेममवाप्नोति सततं(ञ्) जप्यतत्परः ॥ 2॥

सिद्ध्यन्त्युच्चाटनादीनि कर्माणि सकलान्यपि ।
एतेन स्तुवतां(न्) देवीं(म्) स्तोत्रवृन्देन भक्तितः ॥ 3॥

न मन्त्रो नौषधं(न्) तस्य न किञ्चिदपि विद्यते ।
विना जप्येन सिद्ध्येत्तु सर्वमुच्चाटनादिकम् ॥ 4॥

समग्राण्यपि सेत्स्यन्ति लोकशङ्कामिमां(म्) हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं(म्) शुभम् ॥ 5॥

स्तोत्रं(वँ) वै चण्डिकायास्तु तच्च गुह्यं(ञ्) चकार सः ।
समाप्नोति स पुण्येन तां(यँ) यथावन्निमन्त्रणाम् ॥ 6॥

सोऽपि क्षेममवाप्नोति सर्वमेव न सं(म्)शयः ।
कृष्णायां(वँ) वा चतुर्दश्यामष्टम्यां(वँ) वा समाहितः ॥ 7॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थं(म्) रूपेण कीलेन महादेवेन कीलितम् ॥ 8॥

यो निष्कीलां(वँ) विधायैनां(ञ्) चण्डीं(ञ्) जपति नित्यशः ।
स सिद्धः(स्) स गणः(स्) सोऽथ गन्धर्वो जायते ध्रुवम् ॥ 9॥

न चैवापाटवं(न्) तस्य भयं(ङ्) क्वापि न जायते ।
नापमृत्युवशं(यँ) याति मृते च मोक्षमाप्नुयात् ॥ 10॥

ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पूर्णमिदं(म्) प्रारभ्यते बुधैः ॥ 11॥

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं(न्) तत्प्रसादेन तेन जप्यमिदं(म्) शुभम् ॥ 12॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः(फ्) प्रारभ्यमेव तत् ॥ 13॥

ऐश्वर्यं(न्) तत्प्रसादेन सौभाग्यारोग्यमेव च ।
शत्रुहानिः(फ्) परो मोक्षः(स्) स्तूयते सा न किं(ञ्) जनैः ॥ 14॥

चण्डिकां(म्) हृदयेनापि यः(स्) स्मरेत् सततं(न्) नरः ।
हृद्यं(ङ्) काममवाप्नोति हृदि देवी सदा वसेत् ॥ 15॥

अग्रतोऽमुं(म्) महादेवकृतं(ङ्) कीलकवारणम् ।
निष्कीलञ्च तथा कृत्वा पठितव्यं(म्) समाहितैः ॥ 16॥

॥ इति श्रीभगवत्याः(ख्) कीलकस्तोत्रं(म्) समाप्तम् ॥